# Gauramukhakritam Vishnu Stotram

# ગૌરમુખકૃતં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Gauramukhakritam Vishnu Stotram

File name : gauramukhakRRitaMviShNustotram.itx

Category : vishhnu, vishnu, stotra, varAhapurANa

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : varAhapurANa | adhyAya 15/9-19||

Latest update : September 4, 2024

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 4, 2024

*sanskritdocuments.org*

# ગૌરમુખકૃતં વિષ્ણુસ્તોત્રમ્

ગૌરમુખ ઉવાચ ।
સ્તોષ્યે મહેન્દ્રં રિપુદર્પહં શિવં નારાયણં બ્રહ્મવિદાં પ્રતિષ્ઠિતમ્ ।
આદિત્યચન્દ્રાશ્વિયુગસ્થમાદ્યં પુરાતનં દૈત્યહરં સદા હરિમ્ ॥ ૯॥

ચકાર માત્સ્યં વપુરાત્મનો યઃ પુરાકૃતં વેદવિનાશકાલે ।
મહામહીધ્રગ્વપુરગ્રપુચ્છચ્છટાહવાર્ચ્યિઃ સુરશત્રુહાઽઽદ્યઃ ॥ ૧૦॥

તથાબ્ધિમન્થાનકૃતે ગિરીન્દ્રં દધાર યઃ કૌર્મ્મવપુઃ પુરાણમ્ ।
હિતેચ્છયા યઃ પુરુષઃ પુરાણઃ પ્રપાતુ માં દૈત્યહરઃ સુરેશઃ ॥ ૧૧॥

મહાવરાહઃ સતતં પૃથિવ્યાસ્તલાત્તલં પ્રાવિશદ્યો મહાત્મા ।
યજ્ઞાઙ્ગસંજ્ઞઃ સુરસિદ્ધવન્દ્યઃ સ પાતુ માં દૈત્યહરઃ પુરાણઃ ॥ ૧૨॥

નૃસિંહરૂપી ચ ભવત્યજસ્રં યુગે યુગે યોગિવરોગ્રભીમઃ ।
કરાલવક્ત્રઃ કનકાગ્રવર્ચા રત્નાશયોઽસ્માનસુરાન્તકોઽવ્યાત્ ॥ ૧૩॥

બલેર્મખધ્વંસકૃતે મહાત્મા સ્વાં ગૂઢતાં યોગવપુઃસ્વરૂપઃ ।
સ દણ્ડકાષ્ઠાજિનલક્ષણઃ પુનઃ ક્ષિતિં પદાઽઽક્રાન્તવાન્ યઃ સ પાતુ ॥ ૧૪॥

ત્રિઃસપ્તકૃત્વો જગતીં જિગાય જિત્વા દદૌ કશ્યપાય પ્રચણ્ડઃ ।
સ જામદગ્ન્યોઽભિજનસ્ય ગોપ્તા હિરણ્યગર્ભોઽસુરહા પ્રપાતુ ॥ ૧૫॥

ચતુઃપ્રકારં ચ વપુર્ય આદ્યં હૈરણ્યગર્ભપ્રતિમાનલક્ષ્યમ્ ।
રામાદિરૂપૈર્બહુરૂપભેદશ્ચકાર સોઽસ્માનસુરાન્તકોઽવ્યાત્ ॥ ૧૬॥

ચાણૂરકંસાસુરદર્પભીતેર્ભીતામરાણામભયાય દેવઃ ।
યુગે યુગે વાસુદેવો બભૂવ કલ્પે ભવત્યદ્ભુતરૂપકારી ।
યુગે યુગે કલ્કિનામ્ના મહાત્મા વર્ણસ્થિતિં કર્ત્તુમનેકમૂર્ત્તિઃ ॥ ૧૭॥

સનાતનો બ્રહ્મમયઃ પુરાણો ન યસ્ય રૂપં સુરસિદ્ધદૈત્યાઃ ।
પશ્યન્તિ વિજ્ઞાનગતિં વિહાય અથોઽપ્યનેકાનિ સમર્ચ્ચયન્તિ ।

મત્સ્યાદિરૂપાણિ ચરાણિ સોઽવ્યાત્ ॥ ૧૮॥

નમો નમસ્તે પુરુષોત્તમાય પુનશ્ચ ભૂયોઽપિ નમો નમસ્તે ।
નમઃ પુરસ્તાદથ પૃષ્ઠતસ્તે નયસ્વ માં મુક્તિપદં નમસ્તે ॥ ૧૯॥

એવં નમસ્યતસ્તસ્ય મહર્ષેર્ભાવિતાત્મનઃ ।
પ્રત્યક્ષતાં ગતો દેવઃ સ્વયં ચક્રગદાધરઃ ॥ ૨૦॥

તં દૃષ્ટ્વા તસ્ય વિજ્ઞાનં નિસ્તરઙ્ગં સ્વદેહતઃ ।
ઉત્તસ્થૌ સોઽપિ તં લબ્ધ્વા તસ્મિન્ બ્રહ્મણિ શાશ્વતે ।
લયં જગામ દેવાત્મા ત્વપુનર્ભવસંજ્ઞિતે ॥ ૨૧॥

ઇતિ શ્રીવરાહપુરાણે પઞ્ચદશાધ્યાયાન્તર્ગતં
ગૌરમુખકૃતં વિષ્ણુસ્તોત્રં સમાપ્તમ્ ।

વરાહપુરાણ । અધ્યાય ૧૫/૯-૧૯॥

varAhapurANa . adhyAya 15/9-19..

Proofread by PSA Easwaran

*Gauramukhakritam Vishnu Stotram*

pdf was typeset on September 4, 2024

Please send corrections to *sanskrit@cheerful.com*